**Shri Raghunatha Temple MSS. Library,**
**JAMMU**

No. ९६ / घ

Title मितवृत्त्यर्थसंग्रहः पाणिनीयसूत्राणाम् (१म अध्याय)

Author उदयनः

Extent २० पत्र Age

Subject व्याकरण

© Dharmartha Trust J&K. Digitized by eGangotri

ग्रंथ

भिनवृत्तिसूंत्रहाव्याख्यामालिनीय

हृत्तवृत्तिऽ प्रथमाध्यायः

५६

१० पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

नं. ९६ ख

श्री

पुस्तक कमेन्त कृष्णचंद्र पाठकी पत्र





© Dharmartha Trust J&K. Digitized by eGangotri

श्री।अमंदहृदयानंदनिदानंशिवयोर्धिरं।नमस्कुरत्तेहेरंबमवलंबंम नीषिणां॥वस्त्रकीपुस्तककरांपुंडरीकासनस्थितां।शारदांनीरकुं
देंदुधवलांभावयेत्तरां॥२॥मुनित्रयमनंतंज्ञात्वाव्वृत्तीशलोकयत्नतः।करोतुरयनःसाधु [illegible] मितवृत्त्यर्थसंग्रहं॥३॥अथशब्दानुशासनं।अइ
उण्।ऋऌक्।एओङ्।ऐऔच्।हयवरट्।लण्।ञमङणनम्।झभञ्।घढधष्।जबगडदश्।खफछठथचटतव्।कपय्।शषसर्।हल्।इति
माहेश्वरा [illegible] णिचतुर्दशप्रत्याहारसूत्राणिप्रत्याहारस्थलाघवेनशास्त्रप्रवृत्त्यर्थः।वृद्धिरादैच्।संज्ञासूत्रमिदं।प्रायेणास्मिन्नध्यायेसंज्ञाक्र नां४
मणात्।वृद्धिरादैजित्यत्रदेकंविहायसर्वोवारितःसंज्ञीपरोवारितास्संज्ञा।इहतुवृद्धिशब्दोमंगलार्थमादौप्रयुज्यते।आदित्यः।ऐंद्रः।औप
गवः।१।अदेङ्गुणः।पचंति।चेता।स्तोता।२।इकोगुणवृद्धी।परिभाषासूत्रं।गुणवृद्धिरितिचवर्त्तते गुणोवृद्धिरितिचयत्रगुणवृद्धीतत्रेकः
उपतिष्ठते।चेता।अचैषीत्।३।नधातुलोपआर्द्धधातुके।धातुर्धात्वेकदेशस्तस्यलोपोयस्मिन्नार्द्धधातुकेतस्मिन्निकोगुणवृद्धीन।चेक्रियः।लोलुवः।
मरीमृजः।४।क्ङितिच।इकोगुणवृद्धीन।चितः।स्तुतः।मृष्टः।ङिति।चिनुतात्।मृष्टात्।५।दीधीवेवीटां।गुणवृद्धीन।आदीध्यनं।आवेव्यनं।आ
दीध्यकः।आवेव्यकः।कणिता।६।हलोनंतराःसंयोगाः।अनंतराइतिविसदृशोःस्वरैरव्यवहिताः।आद्गिदग्ना।७।मुखनासिकावचनोऽनुनासि
कः।अ अ अ।आपः।तुल्यास्यप्रयत्नंसवर्णं।तुल्यावास्यप्रयत्नोवस्यतुल्यास्यप्रयत्नं [illegible] स्येभ [illegible] मास्यंस्यानमुच्यते।प्रयत्नस्वबला।घलश्चाभ्यंतरः।
दंडाग्रे।तत्रस्थानानि।अकुहविसर्जनीयानांकंठः।इचुयशानांतालु।ऋटुरषाणांमूर्द्धा।ऌतुलसानांदंताः।उपूपध्मानीयानामोष्ठौ।ञमङणनानां
नांनासिकाच।एदैतोःकंठतालु।ओदौतोःकंठोष्ठं।वकारस्यदंतोष्ठं।जिह्वामूलीयस्यजिह्वामूलं।नासिकानुस्वारस्य।यत्नास्त्वाभ्यंतरंभेदेन

© Dharmartha Trust J&K. Digitized by eGangotri

गं

द्विधाः। तत्राभ्यंतरश्चत्वारः। स्पृष्टेषत्स्पृष्टता विवृततासंवृततेति। तत्र स्पृष्टता कादीनां मांतानां पंचविंशति संख्यानां। यरल
वानामीषत्स्पृष्टता। शलाम चां विवृतता। ह्रस्वाकारस्य प्रयोगे संवृतता। तस्यापि प्रक्रियादशायां विवृततेति वक्ष्यते। बाह्यप्रयत्नास्त्व
ष्टौ। विवारसंवारौ श्वासनादौ घोषवदघोषवत्ता। अल्पप्राणता महाप्राणतेति। तत्र खरां विवारश्वासाघोषवत्ता। हशां संवारनादघो
षवत्ता। वर्गेषु युग्मायणश्चाल्पप्राणाः। युग्माः शलश्च महाप्राणाः। सवर्णसंज्ञायामनुपयुज्यमाना अप्येते आंतरतम्यपरीक्षायामुप
का२५ योक्ष्यंते। ऋॢकारयोः सवर्णविधिः। होतॢकारः। होतृकारः। नाज्झलौ। सवर्णौ। दंडहस्तः। दधिशीतं। १०। ईदूदेद्द्विवचनं प्रगृह्यं। अग्नी एतौ
वायू एतौ। खट्वे अमू। ११। अदसो मात्। ईदूतौ प्रगृह्यौ। अमी अत्र। अमू अत्र। १२। शे। प्रगृह्यः। अस्मे इंद्राबृहस्पती। १३। निपात एकाजना
ङ्। एकश्चासावच्च एकाच् प्रगृह्यः। इ अपेहि। १४। ओत्। निपातं प्रगृह्यः। अहो अत्र। १५। संबुद्धौ शाकल्यस्येतावनार्षे। ओत् प्रगृह्यः। अना
र्षे वैदिके परे इति। पटो इति। पटविति। १६। उञः ऊँ। योगविभागोत्र भाष्यात्। उञः। इतौ शाकल्यस्य प्रगृह्यता। उ इति। विति। ऊँ। उञ इतौ शाकल्यस्य।
ऊँ इति दीर्घोऽनुनासिकश्च प्रगृह्यश्च। ऊँ इति। १७। ईदूतौ च सप्तम्यर्थे प्रगृह्यौ। सोमो गौरी अधिश्रितः। मामकी तनू इति। ॥ दाधाघ्वदाप्। प्रणिद
दाति। प्रणिदधाति। १९। आद्यंतवदेकस्मिन्। अतिदेशसूत्रं। औपगवः। आभ्यां। तरतमपौ घः। कुमारितरा। कुमारितमा। २०। बहुगणवतु
डति संख्या। बहुकः। गणकः। तावत्कः। कतिकः। २२। ष्णांता षट्। संख्या। षट्। पंच। २३। डति च। डत्यंता संख्या षट्। कति। २४। क्तक्तवतू

© Dharmartha Trust J&K. Digitized by eGangotri

ख. निष्ठा। कृतः कृतवान् ।२५। सर्वादीनि सर्वनामानि। सर्व विश्व। उभ। उभय। उतर। उतम। अन्य अन्यतर। इतर। त्वत्। त्व। नेम। सम। सिम। पूर्व पर
अवर दक्षिण उत्तरापराधराणि व्यवस्थायामसंज्ञायां। स्वमज्ञातिधनाख्यायां। अंतरं बहिर्योगोपसंख्यानयोः। त्यद्। तद्। यद्। एतद्। इदम्। अदस्।
एक। द्वि। युष्मद्। अस्मद्। भवतु। किम्। सर्वस्मै। विश्वस्मै इत्यादि ।२६। विभाषा दिक्समासे बहुव्रीहौ। सर्वादीनि सर्वनामानि। उत्तरपूर्व
स्यै। उत्तरपूर्वायै ।२७। न बहुव्रीहौ। प्रियसर्वाय ।२८। तृतीयासमासे। सर्वादीनि न सर्वनामानि। मासपूर्वाय ।२९। द्वंद्वे च। सर्वादीनि न सर्वनामा
नि। वर्णाश्रमेतराणां ।३०। विभाषा जसि। द्वंद्वे सर्वादीनि सर्वनामानि। वर्णाश्रमेतरे। वर्णाश्रमेतराः ।३१। प्रथमचरमतयाल्पार्धकतिपयनेमा
श्च। जसि विभाषा सर्वनामानः। प्रथमे। प्रथमाः ।३२। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां। जसि विभाषा सर्वनामानि।
इत्यादि ५ यावद्द्रव्यं व्यवहारानपायो व्यवस्था। पूर्वे। पूर्वाः ।३३। स्वमज्ञातिधनाख्यायां जसि विभाषा सर्वनाम। स्वे। स्वाः। आत्मीयाः इत्यर्थः। आत्मा
न इति वा ।३४। अंतरं बहिर्योगोपसंख्यानयोः। जसि विभाषा सर्वनाम। अंतरे। अंतरा वा गृहा बाह्या इत्यर्थः। अंतरे। अंतरा वा शाटकाः प
रिधानीया इत्यर्थः ।३५। स्वरादिनिपातमव्ययं। स्वर्। अंतर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्। आरात्। अंव
पृथक्। ह्यस्। श्वस्। दिवा। रात्रौ। सायम्। चिरम्। मनाक्। ईषत्। जोषम्। तूष्णीम्। बहिस्। अवस्। समया। निकषा। स्वयम्। वृथा। नक्तं। न
ञ्। हेतौ। इद्धा। अद्धा। सामि। वत्। ब्राह्मणवत्। क्षत्रियवत्। सना। सनत्। सनात्। उपधा। तिरस्। अंतरा। अंतरेण। ज्योक्। कम्। शम्। सहसा। विना २



© Dharmartha Trust J&K. Digitized by eGangotri

नाना। स्वस्ति। स्वधा। अलं। वषट्। श्रौषट्। वौषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो
मिथस्। प्रायस्। मुहुस्। प्रवाहुकं। प्रवाहिका। आर्यहलं। अभीक्ष्णं। साकं। सार्धं। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रता
म्। प्रशान्। प्रतान्। मा। माङ्। स्वरादिराकृतिगणः। निपातावव्ययं ते। ३८। तद्धितश्चासर्वविभक्तिः। अव्ययं। ततः। तत्र। इत्यादि। ३९।
कृन्मेजन्तः। अव्ययं। स्वादुंकारं। वक्षेराय। पिबध्यै। ४०। क्त्वातोसुन्कसुनः। कृत्वा। उदेतोः। विसृपः। ४१। अव्ययीभावश्च। अव्य अव्ययं ७
यं। उपाग्नि। ४०। शि सर्वनामस्थानं। कुंडानि। सुडनपुंसकस्य। सर्वनामस्थानं। सुडिति स्वौजसमौटः। राजा। राजानौ। ४२। न वेति
विभाषा। इतिकरणोऽर्थनिर्देशार्थः। शुश्राव। शुशुवतुः। ४३। इग्यणः संप्रसारणं। कारीषगंधीपुत्रः। [redacted]। ४४। आद्यंतौ
टकितौ। भविता। यापयति। ४५। मिदचोऽन्त्यात्परः। पयांसि। ऋणद्धि। ४६। एच इग्घ्रस्वादेशे। अतिहिः। चित्रगुः। अतिरिः। अतिनुः।
४७। षष्ठी स्थानेयोगा। भविता। ४८। स्थानेन्तरतमः। स्थानं प्रसंगः। स्थानार्थगुणप्रमाणेभ्यो दांतर्यं चतुर्धा। चेता। क्रोष्टा। वाग्घ
सति। अमुना। अमूभ्यां। ४९। उरण्रपरः। कर्त्ता। ५०। अलोन्त्यस्य षष्ठीस्थानेयोगा। सेः। येः। ५१। ङिच्च। अन्त्यस्यालः। अस्मा।
इधा। ५२। आदेः परस्य। परस्य यद्विहितं तत् तस्यादेः। आसीनः। द्वीपं। ५३। अनेकाल्शित्सर्वस्य। भविता। शितः इतः। ५४। स्था
निवदादेशोऽनल्विधौ। देवातिदेशस्सूत्रे। वद्धाय। आवधिषीष्ट। ५५। अचः परस्मिन्पूर्वविधौ। आदेशः स्थानिवत्। अल्विध्य
र्थमिदं। वध्रुश्च। ५६। नपदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। अचः परस्मिन्पूर्वविधावादेशः स्थानि

इतआरभ्यानेकाल्शिदित्यंतं परिभाषाप्रकरणाति ६

© Dharmartha Trust J&K. Digitized by eGangotri

वत्।कानिसंति [redacted]। दध्यत्र [redacted]याया वरः।यात्तिं।चिकीर्षकः।श्रिएढा प्रतिदीव्ना।सजिधिप्समेजद्दनुः।५७।द्विर्वचनेचि।द्वि
र्वचनइत्यावर्त्तते।द्विर्वचनेचिअच आदेशो न द्विर्वचनेकर्तव्ये।चक्रतुः।अदर्शनं लोपः।हे अग्ने।प्रत्ययस्य लुक्श्लुलुपः।अदर्श
नं [redacted] तद्भावित पदाश्रयणं।लुक्।श्लु।लुबित्येवं प्रत्ययादर्शनं गृह्यते।आमलकं।जुहोति।पंचालाः।६०।प्रत्ययलो
पे प्रत्ययलक्षणं।अत्र लोड्।नलुमताङ्गस्य।प्रत्ययलोपे प्रत्ययलक्षणं।गर्गाः।मृजुतः। [redacted]।६२।अचोन्त्यादि टि।अपरं लि
ङ्ग्रहणे षष्ठी।अंत्या दीति बहुव्रीहिः।पचेते।मनीषा।६३।अलोन्त्यात्पूर्व उपधा।चेततीति।६४।तस्मिन्नितिनिर्दिष्टे पूर्वस्य।तस्मिन्निति
सप्तम्यंतानुकरणं।एवमुत्तरसूत्रेत स्मादितिपंचम्यंतानुकरणं।निर्दिष्टेनिरंतरमुच्चारिते।दध्युदकं।अग्निचित्।६५।तस्मादित्यु
त्तरस्य।निर्दिष्टे।उत्थानं।६६।स्वंरूपंशब्दस्याशब्दसंज्ञा।आग्नेयं।६७।अणुदित्सवर्णस्य चाप्रत्ययः।शार्ङ्गीभवति।उदित्।ओदनप
क्।सुयुक्।६८।तपरस्तत्कालस्य।खट्वेंद्रः।मध्वेआगच्छ।६९।आदिरंत्येन सहेता।अर्थात्मध्यगानां स्वस्य च।चेततीति।येनविधि
स्तदंतस्य।येन करणेन विधिर्विधीयते यथा चाधातोः।चेयं।जेयं।यस्मिन्विधिस्तदादावल्ग्रहणे इतिवक्तव्यं।अयः।७१।वृद्धि
र्यस्याचामादिस्तद्वृद्धं।शालीयः।त्यदादीनि च।वद्धानि।त्वदीयं।यदीयं।७३।एङ् प्राचां देशे।यस्याचामादिस्तद्वृद्धं।प्राचामि त्या
चार्यनिर्देशार्थं व्यवस्थितविभाषार्थं चेति कुणिः।देशविशेषणमिति जयादित्यः।एणीपचनीयः।गोनर्दीयः।इति पाणिनिसूत्राणां मितवृत्त्य

© Dharmartha Trust J&K. Digitized by eGangotri

र्थ संग्रहे। पादः प्राथमिको ध्यायस्याद्यस्यायं समर्थितः। ॥ गाङ्कुटादिभ्यो ऽञ्णिन्ङित्॥ गाङ् इति इङादेशः। अध्यगीष्ट। कुटादिभ्यः
कुटिता। पुटिता। कुट। पुट। कुच। गुज। गुड। डिप। छुर। स्फुट। मुट। त्रुट। तुट। चुट। छुट। जुट। कड। लुठ। कृड। कुड। पुड। घुड। तुड।
तुड।तूड। थुड। [redacted]। स्फुड। स्फुर। स्फुल। गुरी। णू। धू। गुधु। कूङ। [redacted]। ञोरः। नोपधादित्ययं अतिदेशप्रकरणं। २। विजइट्। ङित्। [redacted]
उद्विजिता। ३। विभाषोर्णोः। [redacted] इट् ङित्। ऊर्णुविता। ऊर्णविता। ४। सार्वधातुकमपित्। ङित्। चिनुतः। ५। असंयोगाल्लिट्कित्। अपित्। निन्
तुः। बिभिदतुः। ५। इंधिभवतिभ्यां च। लिट् कित्। पुत्रईधे अथर्वणः। बभूव। बभूविथ। ६। मृडमृदगुधकुषक्लिशवदवसः क्त्वा। कित्
न क्त्वा सेडिति प्रतिषेधे गुधकुषक्लिशीनां रलो व्युपधादिति विकल्पे च प्राप्ते वचनं। मृडित्वा [redacted] उदित्वा। उषित्वा। ७। रुद
विदमुषग्रहिस्वपिप्रच्छः संश्च। चात्क्त्वा कित्। रुदविदमुषीणां रलो व्युपधादिति विकल्पे ग्रहेर्न क्त्वा सेडिति निषेधे च प्राप्ते विधर्थं स्वपिप्रच्छोस्तु
सन्नर्थं ग्रहणं रुदित्वा। रुरुदिषति। गृहीत्वा। ८। इको झल्। सन् कित्। चिचीषति। तुष्टूषति। चिकीर्षति। ९। हलन्ताच्च। हलंताच्चेति कर्मधा नंप
रयों नशब्दस्समीपार्थः [redacted]। बिभित्सति। १०। लिङ्सिचावात्मनेपदेषु। इको हलंतात् झलौ कितौ। भित्सीष्ट। अभित्त। ११। उश्च।
ऋलौ लिङ्सिचौ कितौ। कृषीष्ट। अकृत। १२। वा गमः। झलौ लिङ्सिचौ कितौ। संगसीष्ट। संगंसीष्ट। समगत। समगंस्त। १३। हनः सिच्। म
कित्। आहत। आहसातां। १४। यमो गंधने। सिच् कित्। उदायत। उदायसातां। १५। विभाषोपयमने। यमः सिच् कित्। रामः सीता
मुपायत। उपायंस्त वा। १६। स्थाघ्वोरिच्च। चात्सिच् कित्। उपास्थित। उपास्थिषातां। अदित। अधित। १७। न क्त्वा सेट्। कित्। देवित्वा

वात्मनेपदेषु ३ जिघत्सति·सुप्त्वा·सुषुप्सति·दृष्ट्वा·दिदृक्षिषति·५ इको झल्·सन् कित्·५

© Dharmartha Trust J&K. Digitized by eGangotri

१९ । निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः । से[redacted] किन्न । शयितः । शयितवान् । १९ मृषस्तितिक्षायां । सेण्निष्ठा किन्न । मर्षितः । मर्षितवान् ।
२० । उदुपधाद्भावादिकर्मणोरन्यतरस्यां । सेण्निष्ठा किन्न । मुदितं मोदितं साधुना । प्रमुदितः । प्रमोदितः साधुः । २१ । पूङः क्त्वा च । सेण्न कित्क्त्वा
न्निष्ठा । पवितः । पवितवान् । पवित्वा । २२ । नोपधात्थफान्ताद्वा । सेट् क्त्वा किन्न । ग्रथित्वा । ग्रन्थित्वा । गुफित्वा । गुम्फित्वा । २३ । वञ्चिलुञ्च्यृतश्च । सेट्
क्त्वा वा किन्न । वचित्वा । वंचित्वा । लुचित्वा । लुंचित्वा । ऋतित्वा । अर्तित्वा । २४ । तृषिमृषिकृशेः काश्यपस्य । सेट् क्त्वा वा किन्न । काश्यपग्रहणं पूजा
र्थं । तृषित्वा । तर्षित्वा इत्यादि । २५ । रलो व्युपधाद्धलादेः संश्च । वा सेट् क्त्वा किन्न । वी ति उकारे कारौ । द्युतित्वा । द्योतित्वा । दिद्युतिषते । दिद्योति ३५
लिलिखित्वा लेखित्वा लिलिखिषति लिलेखिषति
षते । २६ । ऊकालोऽज्झ्रस्वदीर्घप्लुतः । ऊ इत्येकद्वित्रिमात्राणां क्रमेण प्रश्लिष्टनिर्देशः । अ इ इति कुमारी छत्रं ए हि देवदत्ता ३ त्र । २७ । अचश्च । परिभाषासू
त्रमिदं । [redacted] ह्रस्वदीर्घप्लुतशब्दा अचः परत उपतिष्ठते । विमेति । शाम्यति । अग्नेयतुक्रहि । २८ । उच्चैरुदात्तः । अच् । आये नीचैरनुदात्तः । अ
र्वाङ् । ३० । समाहारः स्वरितः । समाहार इत्युदात्तानुदात्तत्वयोः समाहार एवानुच्यते । कंवोश्वा । ३१ । तस्यादित उदात्तमर्द्धह्रस्वं । आदितः अ
दौ । अर्द्धह्रस्वमर्द्धमात्रा । ह्रस्वग्रहणमतंत्रमिति परे [redacted] उदात्तानुदात्तयोः समाहारः स्वरितस्तत्र न ज्ञायते कस्मिन्नंश उदात्तं कस्मिन्वानुदात्त
मिया नुदात्तं किया नवुदात्तमिति तदुभयमनेनाख्यायते । क१वोश्वाः । न्य१ङ्ख्वस्य । ३२ । एकश्रुति दूरात्संबुद्धौ । एकाश्रुतिर्यस्मिंस्तद्वाक्यं । आग
च्छ भो माणवक देवदत्ता ३ । ३३ । यज्ञकर्मण्यजपन्यूङ्खसामसु । एकश्रुति । जपो नाम उपांशुप्रयोगो यथा जले निमग्नस्य स्यैके । आकाणीभ्रलोमंत्र
इत्यन्ये । न्यूङ्खा नाम षोडश ओकाराः । तेषु प्रथमसप्तत्रयोदशाश्चय उदात्ताः त्रिमात्राश्च । इतरे त्रयोदशानुदात्ता अर्द्धौकाराः । गीतिषु सामा
ख्येति जैमिनिः । अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं । अपां रेतांसि जिन्वते । जपेत्यादि किं । अग्ने व्रतपते व्रतं चरिष्यामि । ३४ । उच्चैस्तरां वा ४

७ इसेवम्

© Dharmartha Trust J&K. Digitized by eGangotri

वावषट्कारः।यज्ञकर्मणि।वषट्शब्देनवौषट्शब्दोऽन्त्यस्य ने।सोमस्याग्नेवीहीतोवौषट्।२।३५।विभाषाछंदसि।एकश्रुति।संप्रदायव्य
वस्थितोविकल्पः।तेनबह्वृचानांस्वाध्यायकालेसंहितायांत्रैस्वर्यमेव।ब्राह्मणेत्वेकश्रुतिः।शाखांतरेष्वपियथासंप्रदायंव्यवस्था
३६।नसुब्रह्मण्यायांस्वरितस्यतूदात्तः।एकश्रुति।सुब्रह्मण्यानामनिगदः।सुब्रह्मण्योइंद्रागच्छहरिवआगच्छमेधातिथेर्मेषवृष
णश्वस्यमेनेगौरावस्कंदिन्नहल्यायैजारकौशिकब्राह्मणगौतमब्रुवाण।सुत्यामागच्छमघवन्।३७।देवब्रह्मणोरनुदात्तः।सुब्रह्म
ण्यायां।पूर्वेणस्वरितस्योदात्तत्वेप्राप्तेवचनं।देवाब्रह्माणआगच्छ।३८।स्वरितात्संहितायामनुदात्तानां।एकश्रुति।इमंमेगंगेयमु
नेसरस्वती।३९।उदात्तस्वरितपरस्यसन्नतरः।अनुदात्तस्य।सन्नतरोऽनुदात्ततरः।अग्नि।कन्या।४०।अथतत्एकात्प्रत्ययः।
नं भूयाः।४१।तत्पुरुषःसमानाधिकरणःकर्मधारयः।महानवमी।प्रथमानिर्दिष्टंसमासउपसर्जनं।कृष्णश्रितः।४२।एकविभक्तिचापूर्वे
समासेउपसर्जन निपाते।अतिमालः।४४।अर्थवदधातुरप्रत्ययःप्रातिपदिकं।डित्थः।४५।कृत्तद्धितसमासाश्च।प्रातिपदिकानि।कर्ता।औपगवः।राज
पुरुषः।४६।ह्रस्वोनपुंसकेप्रातिपदिकस्य।श्रीपंकुलं।अतिरि।अतिनु।इत्यापादसमाप्तेर्विधिप्रकरणं।४७।गोस्त्रियोरुपसर्जनस्य
प्रातिपदिकस्यह्रस्वः।स्त्रीतिस्त्रीप्रत्ययोपलक्षणं।निष्कौशांबिः।४८।लुक्तद्धितलुकि।उपसर्जनस्यस्त्रियः।पंचालाः।४९।इद्गोण्याः।त
द्धितलुकि।पंचगोणिः।५०।लुपियुक्तवद्व्यक्तिवचने।युक्तप्रकृत्यर्थः।व्यक्तिलिंगं।वचनंसंख्या।पंचालशब्दोबहुवचनांतः।पुंसि।पंचालानां
निवासोजनपदःपंचालाः।५१।विशेषणानांचाजातेः।लुपिविशेषणानांयुक्तवद्व्यक्तिवचने।पंचालारमणीयाः।अजातेःकिं।पांचाला

© Dharmartha Trust J&K. Digitized by eGangotri

मित॰

ऽजनपदः।५३।तदशिष्यंसंज्ञाप्रमाणत्वात्।तदितियुक्तवत्सूत्रं।संज्ञाप्रमाणत्वात्संज्ञाप्रतिपादकत्वात्।पंचालादिशब्दाहिआपोदाय
स्त्वादिवन्नियतविषयाःसंज्ञाश्शब्दाइतिभावः।५३।लुब्योगाप्रख्यानात्।लुबपिअशिष्यः।योगस्यावयवार्थस्याप्रख्यानाद्प्रती
तेः।संज्ञाशब्दत्वादेवेतिभावः।५४।योगप्रमाणेचतदभावेऽदर्शनंस्यात्।यदिहियोगप्रमाणंस्यात्तर्हियोगाभावेपंचालादिशब्दानांप्र
योगोनस्यात्।५५।प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्।अशिष्यं।अन्यप्रमाणत्वात्लोकप्रमाणत्वात्।५६।कालोपसर्जनेचतु
ल्यं।अशिष्यं।इहान्येवैयाकरणाआहुः।आतीतायारात्रेःपश्चार्द्धेनागामिन्याःपूर्वार्द्धेनचसहितोदिवसोऽद्यतनः।अप्रधानमुपसर्जन
मित्यादितन्नकर्तव्यं।लोकप्रसिद्धेरेवेतिभावः।५७।जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां।संपन्नोव्रीहिः।संपन्नाव्रीहयः।
५८।अस्मदोद्वयोश्च।वाऽदेकस्मिन्बहुवचनं।वयंब्रूमः।अहंब्रवीमि।आवांब्रूवइतिवा।५९।फल्गुनीप्रोष्ठपदानांचनक्षत्रे।अन्यतरस्यांद्वयो
र्बहुवचनं।पूर्वेफल्गुन्यौ।पूर्वाफल्गुन्यः।पूर्वेप्रोष्ठपदे।पूर्वाःप्रोष्ठपदाः।फल्गुन्योःप्रोष्ठपदोश्चदेतारे।६०।छंदसिपुनर्वस्वोरेकवचनं।द्वयोरन्यतर
स्यां।पुनर्वसुनक्षत्रंआदितिर्देवता।पुनर्वसूवा।पुनर्वस्वोर्हेतारे।६१।विशाखयोश्च।द्वयोरेकवचनंछंदस्यन्यतरस्यां।विशाखानक्षत्रमिं
द्राग्नीदेवता।विशाखेनक्षत्रेवा।विशाखयोर्द्वेतारे।६२।तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वेबहुवचनस्यद्विवचनंनित्यं।तिष्यएकपुनर्वसूद्वौतेषांद्वं
द्वोबहुत्वार्थः।तत्रबहुवचनेप्राप्तइदं।उदितौतिष्यपुनर्वसूदृश्येते।६३।सरूपाणामेकशेषएकविभक्तौ।रामश्चरामश्चरामौ।रामाः।६४।वृद्धोयूना
तल्लक्षणश्चेदेवविशेषः।शिष्यते।वृद्ध----।तल्लक्षणोवृद्धयुवनिमित्तकः।गार्ग्यश्चगार्ग्यायणश्चगार्ग्यौ।६५।स्त्रीपुंवच्च।यूनासहोक्तौवृद्धास्त्रीशि
ष्यतेतल्लक्षणश्चेदेवविशेषः।गार्गीचगार्ग्यायणश्चगार्ग्यौ।६६।पुमान्स्त्रियाशेषः।तल्लक्षणश्चेदेवविशेषः।हंसश्चहंसीचहंसौ।६७।भ्रातृपुत्रौस्वसृ

॥५॥ ॥५॥

© Dharmartha Trust J&K. Digitized by eGangotri

दुहितृभ्यां।शेषः।भ्राताचस्वसाचभ्रातरौ।पुत्रश्चदुहिताचपुत्रौ।६८।नपुंसकमनपुंसकेनैकवच्चान्यतरस्यां।शेषस्तद्धदएएवविशेषश्चेत्।शु
क्लःपटःशुक्लंवस्त्रंशुक्लाचबृहतिकातदिदंशुक्लं।तानीमानिशुक्लानि।६९।पितामात्रा।शेषोऽन्यतरस्यां।माताचपिताचपितरौ।मातापितरौ
वा।७०।श्वशुरःश्वश्र्वा।शेषोऽन्यतरस्यां।श्वश्रूश्चश्वशुरश्चश्वशुरौ।श्वश्रूश्वशुरौ।७१।त्यदादीनिसर्वैर्नित्यं।सचदेवदत्तश्चतौ।७२।ग्राम्यपशुसं
घेष्वतरुणेषुस्त्री।शेषः।पुमान्स्त्रियेतिपुंसःशेषप्राप्तेइदं।गावइमाः।अनेकशफेष्वितिवक्तव्यं।नेह।अश्वाइमे।७३। ।इतिपाणिनिसूत्रालिखि
तव्यत्यर्थसंग्रहे॥ ॥भ्वाद्योधातवः।भ्वादीनांवकारोयंमंगलार्थःप्रयुज्यते।भ्वोवार्थंवदंतीति
भ्वार्थावावादयःस्मृताः।भ्वाद्योधातुपाठोक्ताः।तथाहि।भू।एध।स्पर्द्ध।गाधृ।बाधृ।नाथृ।नाधृ।दध।स्कुदि।श्विदि।वदि।भदि।मदि।स्पदि।क्लिदि
मुद।दद।ष्वद।स्वर्द।ऊर्द।कुर्द।खुर्द।गुर्द।गुद।षूद।ह्राद।ह्लादी।स्वाद।यती।युतृ।जुतृ।विथृ।वेथृ।श्रथि।ग्रथि।कत्थ। ।अत।चुतिर्।च्युतिर्।
मंथ।कुथि।पुथि।लुथि।मथि।षिध।षिधू।खादृ।खद।बद।गद।रद।णद।अर्द।नर्द।गर्द।तर्द।कर्द।खर्द।अति।अदि।इदि।बिदि।गडि।णिदि।टुनदि
चदि।त्रदि।कदि।क्रदि।क्लदि।क्लिदि।शुंध। ।शीकृ।लोकृ।श्लोकृ।द्रेकृ।ध्रेकृ।रेकृ।सेकृ।स्रेकृ।स्रकि।श्रकि।श्लकि।शकि।अकि।वकि।मकि।कक।
कुक।वृक।चक।ककि।वकि।श्वकि।त्रकि।ढौकृ।त्रौकृ।ष्वष्क।वस्क।मस्क।टिकृ।तिकृ।तीकृ।रघि।लघि।अघि।वघि।मघि।राघृ।लाघृ।द्राघृ
श्लाघृ। ।फक्क।तक।तकि।बुक्क।कख।ओखृ।राखृ।लाखृ।द्राखृ।ध्राखृ।शाखृ।श्लाखृ।उख।उखि।वख।वखि।मख।मखि।णख।णखि।रख
रखि।लख।लखि।इख।इखि।ईख।ईखि।वल्गर।जिल।जिव।गिम।तगि।लगि।श्रगि।श्लगि।इगि।रिगि।लिगि।युगि।जुगि।बुगि।घघ।मघि
शिघि। ।वर्च।षच।लोचृ।शच।श्वच।श्वचि।कच।कचि।काचि।मच।मुचि।मचि।पचि।ष्टुच।ऋज।ऋजि।भृजी।एजृ।भ्रेजृ।भ्राजृ।ईज। ।शुच।कु

© Dharmartha Trust J&K. Digitized by eGangotri

6

कुंच । क्रुंच । लुंच । अंचु । वंचु । चंचु । तंचु । त्वंचु । म्रुंचु । म्लुंचु । ग्रुचु । ग्लुचु । कुजु । खुजु । ग्लुंचु । षस्ज । गुजि । अर्च । म्लेछ । लछ । लाछि । वाछि । ह्री
छ । हुर्छा । मुर्छा । स्फुर्छा । युछ । उछि । उछी । ध्रज । ध्रजि । धृज । धृजि । ध्वज । ध्वजि । कूज । अर्ज । षर्ज । गर्ज । तर्ज । कर्ज । खर्ज । अज । तेज । खज । खजि ।
टुओस्फूर्जा । क्षि । लज । लजि । लाज । लाजि । जज । जजि । तुज । तुजि । गज । गजि । गृज । गृजि । मुज । मुजि । वज । व्रज । । अट्ट । वेष्ट । चेष्ट । गोष्ट । लोष्ट । घ
ट्ट । स्फुट । अठि । वठि । मठि । कठि । मुठि । हेठ । एठ । हिडि । हुडि । कुडि । वडि । मडि । भडि । पिडि । मुडि । तुडि । चडि । शडि । तडि । पडि । कडि । खडि । हेडृ । होडृ ।
बाडृ । द्राडृ । ध्राडृ । शाडृ । । शौटृ । यौटृ । म्लेटृ । म्रेडृ । कटे । अट । पट । रट । लट । शट । वट । किट । खिट । शिट । षिट । अट । पट । शूट । जट । झट । वट । वि
ट । खिट । शिट । षिट । जट । झट । भट । तट । खट । णट । पिट । हट । षट । लुट । चिट । विट । बिट । इट । किट । कटी । मडि । कुडि । मुड । प्रुडि । मुडि । रुटि । लुटि ।
स्फुटिर् । पठ । वठ । मठ । कठ । रट । हठ । रुठ । लुठ । पिठ । शठ । शुठ । कुठि । लुठि । शुठि । रुठि । लुडि । चुड्ड । अड्ड । कड्ड । क्रीडृ । तुडृ । हुडृ । हूडृ । होडृ । रौडृ । लो
डृ । अड । लड । कड । कडि । । तिपृ । तेपृ । ष्टिपृ । ष्टेपृ । ग्लेपृ । टुवेपृ । केपृ । गेपृ । रेपृ । लेपृ । त्रपूष् । कपि । रबि । लबि । अबि । कब । क्लीबृ । क्षीबृ । शीभृ
चीभृ । रेभृ । ष्टभि । स्कभि । जभी । जृभी । शल्भ । वल्भ । गल्भ । श्रम्भु । ष्टुभु । । गुपू । धूप । जप । जल्प । चप । सप । रप । लप । चुप । तुप । तुंप । त्रुप । त्रुंप । तुफ । तुंफ ।
त्रुफ । त्रुंफ । पर्प । रफ । रफि । अर्ब । पर्ब । लर्ब । बर्ब । मर्ब । कर्ब । खर्ब । गर्ब । षर्ब । चर्ब । कुबि । लुबि । तुबि । चुबि । षृभु । षिभु । शुभ । शुंभ । । घिणि । घुणि ।
घृणि । घुण । घूर्ण । पण । पन । भाम । क्षमूष् । कमु । । अण । रण । वण । भण । मण । कण । क्वण । व्रण । भ्रण । ध्वण । ओणृ । शोणृ । श्रोणृ । पैणृ । ध्रण । कनी । ष्टन
। वन । षण । अम । द्रम । हम्म । मीमृ । चमु । छमु । जमु । झमु । क्रमु । । अय । वय । पय । मय । चय । तय । णय । दय । रय । ऊयी । पूयी । क्नूयी । क्ष्मायी । स्फायी । ओप्या
॥६॥ यी । तायृ । शल । वल । वल्ल । मल । मल्ल । भल । भल्ल । किल । कल्ल । मेवृ । देवृ । षेवृ । गेवृ । ग्लेवृ । पेवृ । मेवृ । म्लेवृ । रेवृ । । मव्य । सूर्क्ष्य । ईर्क्ष्य ।
ईर्ष्य । हय । शुच्य । हर्य । अल । ञिफला । मील । श्मील । स्मील । पील । नील । शील । कील । कूल । शूल । तूल । पूल । मूल । फल । चुल्ल । फुल्ल । चिल्ल । तिल

© Dharmartha Trust J&K. Digitized by eGangotri

॥६॥

वेलृ।चेल्ल।केलृ।खेलृ।क्ष्वेल्ल।वेह्लृ।पेल्ल।फेलृ।शेलृ।स्खल।खल।गल।षल।दल।श्वल।श्वल्ल।खोलृ।खोरृ।धोरृ।त्सर।क्मर।अभ्र।वभ्र।मभ्र।चर।ष्ठि
वु।जी।जीव।पीव।मीव।तीव।नीव।क्षुर्वी।तुर्वी।थुर्वी।दुर्वी।धुर्वी।गुर्वी।मुर्वी।पुर्व।पर्व।मर्व।चर्व।भर्व।कर्व।खर्व।गर्व।अर्व।शर्व।षर्व।इवि।पिवि।मिवि।निवि।हिवि।
दिवि।धिवि।जिवि।रिवि।रवि।धवि।कृवि।मव।अव।धावु। धुक्ष।धिक्ष।वृक्ष।शिक्ष।भिक्ष।क्लेश।दक्ष।दीक्ष।ईक्ष।ईष।भाष।गेषृ।वेषृ।पेषृ।जेषृ।एषृ।प्रेषृ।रेषृ।
हेषृ।फेषृ।कासृ।भासृ।णासृ।रासृ।णस।भ्यस।ग्रसु।ग्लसु।ईह।बहि।महि।अहि।गर्ह।गल्ह।बर्ह।बल्ह।वर्ह।वल्ह।प्लिह।वेहृ।जेहृ।बाहृ।द्राहृ।ऊह।गाहू।ग्लह।घुषि। घुषि
र्।अक्ष।तक्ष।त्वक्ष।उक्ष।रक्ष।णिक्ष।त्रक्ष।ष्टक्ष।णक्ष।वक्ष।मृक्ष।तक्ष।सूर्क्ष।काक्षि।वाक्षि।माक्षि।ध्राक्षि।ध्वाक्षि।चूष।तूष।पूष।मूष।लूष।रूष।शूष।यूष।
जूष।ऊष।ईष।कष।खष।शिष।जष।झष।शष।वष।रुष।रिष।भष।उष।जिषु।विषु।पुष।श्रिषु।श्लिषु।पुषु।प्लुषु।पृषु।वृषु।मृषु।घृषु।हृषु।तुस।ह्रस।ह्लस।रस।लस।घस्लृ।
जर्ज।चर्च।झर्झ।पिस्सृ।पेस्सृ।हसे।णिश।मिष।मश।शव।शश।शसु।चह।महि।रहि।दृह।दृहि।बृह।बृहि।तुहिर्।दुहिर्।उहिर्।अर्ह। द्युत।ञिमिदा।ञिष्विदा।रुच।घु
ट।रुट।लुट।लुठ।शुभ।क्षुभ।णभ।तुभ।स्रंसु।ध्वंसु।भ्रंसु।भ्रंशु।वृतु।वृधु।शृधु।स्यंदू।कृपू। घट।व्यथ।प्रथ।प्रस।म्रद।स्खद।क्षजि।दक्ष।क्रप।कदि।क्रदि।क्ल
दि।ञित्वरा।घटादयः षितः। ज्वर।गड।हेड।वट।भट।णट।ष्टक।चक।कखे।रगे।लगे।ह्रगे।ह्लगे।षगे।ष्टगे।कगे।अक।अग।कण।रण।चण।शण।श्रण।श्रथ।क्नथ।
क्रथ।क्लथ।वन।वनु।ज्वल।ह्वल।ह्मल।स्मृ।दॄ।नॄ।श्रा।पा के।मारणतोषणनिशामनेषु ज्ञा।कम्पने चलिः।छदि।ऊर्जने।मथे।लडि।मदी।ध्वन।दल।वल।स्खल।त्र
पा।ष्टै।घटादयो मितः।जनीजॄष्क्नसुरञ्जोऽमन्ताश्च।ज्वलह्वलह्मलनमामनुपसर्गाद्वा।ग्लास्नावनुवमां च।न कम्यमिचमाम्।मित्वं।शमोऽदर्शने।मि
तां।यमोऽपरिवेषणे मित्त्वं न।स्खदिरवपरिभ्यां च।न मित्त्वं।फण।राजृ।टुभ्राजृ।टुभ्राशृ।टुभ्लाशृ। स्यमु।स्वन।ध्वन।षम।ष्टम।ज्वल।चल।जल।टल।ट्वल।ष्ठल।हल।णल।
पल।बल।पुल।कुल।शल।हुल।पत्लृ।क्वथे।पथे।मथे।टुवम।भ्रमु।क्षर। षह।रमु। षद्लृ।शद्लृ।क्रुश।कुच।बुध।रुह।कस। हिक्क।अंचु।टुयाचृ
रेटृ।चत।चदे।प्रोथृ।मिदृ।मेधृ।णिदृ।णेदृ।शृधु।मृधु।बुधिर्।उबुंदिर्।वेणृ।खनु।चीवृ।चायृ।व्यय।दाशृ।भेषृ।भ्रेषृ।भ्लेषृ।अस।स्पश।लष।चष।छ
ष।झष।भ्रक्ष।भ्लक्ष।दासृ।माहृ।गुहू। श्रिञ्।भृञ्।हृञ्।धृञ्।णीञ्। धेट्।ग्लै।म्लै।द्यै।द्रै।ध्रै।ध्यै।रै।स्त्यै।ष्ट्यै।खै।क्षै।जै।षै।कै।गै।शै।श्रै।पै।ओवै।

© Dharmartha Trust J&K. Digitized by eGangotri

ष्टै।स्तै।दैप्।पा।घ्रा।ध्मा।ष्ठा।म्ना।दाण्।हृ।स्वृ।स्मृ।स्तृ।सृ।ऋ।गृ।धृ।ध्वृ।स्रु।श्रु।शृ।ध्रु।दु।द्रु।जि।।षिङ्।शुङ्।गाँङ्।कुङ्।खुङ्।उङ्।डुङ्।च्युङ्।
ज्युङ्।प्रुङ्।प्लुङ्।रुङ्।धृङ्।मेङ्।देङ्।श्येङ्।प्यैङ्।त्रैङ्।पूङ्।मूङ्।डीङ्।।तॄ।।गुप।तिज।मान।बध।डुलभष्।ष्वंज।हद।।ञिष्विदा।स्कंदिर्।यभ।
णम।गम्ल।सृप्ल।यम।तप।त्यज।षंज।दृशिर्।दंश।कृष।दह।मिह।कित।दान।शान।डुपचष्।षच।भज।रंज।शप।त्विष।यज।डुवप्।वह।।वस।
।वेञ्।व्येञ्।ह्वेञ्।।वद।टुओश्वि।।इति शब्विकरणा भ्वादयः।तथा अदादयः लुग्विकरणाः।जुहोत्यादयः श्लुविकरणाः।दिवादयः श्यन्विकरणाः।
स्वादयः श्नुविकरणाः।तुदादयः शविकरणाः।रुधादयः श्नम्विकरणाः।तनादयः उविकरणाः।क्र्यादयः श्नाविकरणाः।चुरादयः णिजन्ताः।शवि
करणा आचार्येणाभ्युपगमादित्तः कृत्वा पठिता इति तेषां धातुसंज्ञा भवति।एषामनुबंधासंगत्वेन आपयोग्यत्वादितिवक्ष्यते।अदादित्वन्यविकरणवि
धौ विवेचयिष्यामः।उपदेशेऽजनुनासिक इत्।उपदेशः शास्त्रमिति ग्रंथः।आद्योच्चारणमित्यन्ये।प्रतिज्ञानुनासिक्याः पाणिनीयाः।एधते।भवान्।२।हलं
त्यं।उपदेशे इत्।शेते।न विभक्तौ तुस्माः।इतः।रामात्।पचेरन्।पचतः।रामम्।४।आदिर्ञिटुडवः।इत उपदेशे।इडः।वेपथुः।उद्गिमं।५।षः प्रत्ययस्य।आदिः इतः।
[illegible]नर्तकी।६।चुटू।प्रत्ययस्य आदी इतो।कौंजायनः।ब्राह्मणाः।शांडिक्यः।कुरुचरी।उपसरजः।आन्नः।७।लशक्वतद्धिते।प्रत्ययस्यादिरन्।भवनां भ
वति।भुक्तः।प्रियंवदः।जिष्णुः।भंगुरं।हरये।८।तस्य लोपः।तस्येतः।इडः।९।यथासंख्यमनुदेशः समानां।अर्यादुदेशिनां।समूलघातमित्यादि।१०।स्वरितेना
धिकारः।इत्थंभूतलक्षणे तृतीया।अधिकारो विनियोगः।परिभाषेयं।११।अनुदात्तङित आत्मनेपदं।धातोः।एधते।स्पर्धते।इतउत्तरमापादपरिसमाप्तेर्नि
यमसूत्राणि।तिप्तसिझ्याद्यैर्नाम्नामात्मनेपदविहितानां जोदेशानां नियमनात्।१२।भावकर्मणोः।आत्मनेपदं।सुप्यते भवता।अनुभूयते सुखं।१३।कर्तरि क
र्मव्यतिहारे।आत्मनेपदं।कर्म क्रिया।व्यतिहारो विनिमयः।व्यतिलुनीते।अन्यस्य योग्यं लवनं करोतीत्यर्थः।१४।नगतिहिंसार्थेभ्यः।आत्मनेपदं कर्त
रि कर्मव्यतिहारे।व्यतिगच्छन्ति।व्यतिघ्नंति।१५।इतरेतरान्योन्योपपदाच्च।कर्तर्यपि कर्मव्यतिहारे आत्मनेपदं न।इतरेतरस्यान्योन्यस्य वा व्यतिलुनंति।



© Dharmartha Trust J&K. Digitized by eGangotri

नेर्विशः। आत्मनेपदं। निविशते ॥१७॥ परिव्यवेभ्यः क्रियः। आत्मनेपदं। नित्वार्थे ऽकर्त्रभिप्रायार्थमिदं। परिक्रीणीते। विक्रीणीते। अवक्रीणीते ॥१८॥ विपरा
भ्यां जेः। आत्मनेपदं। विजयते। पराजयते ॥१९॥ आङो दोऽनास्यविहरणे। आत्मनेपदं। विहरणं विकासः। विद्यामादत्ते ॥२०॥ क्रीडोऽनुसंपरिभ्यश्च। चादाङः। आत्मने
पदं। अनुक्रीडते इत्यादि ॥२१॥ समवप्रविभ्यः स्थः। संतिष्ठत इत्यादि। आङः प्रतिज्ञायामुपसंख्यानं। शब्दं नित्यमातिष्ठते। नित्यत्वेन प्रतिजानीत इत्यर्थः ॥२२॥ प्रकाश
नस्थेयाख्ययोश्च। आत्मनेपदं। तिष्ठते कन्या छात्रेभ्यः। स्वाभिप्रायं प्रकाशयतीत्यर्थः। स्थेयो विवादपदे निर्णेता। तस्याख्यायां। संशय्य कर्णादिषु तिष्ठते यः। कर्णा
दीन्निर्णेतृत्वेनाश्रयतीत्यर्थः ॥२३॥ उदोऽनूर्ध्वकर्मणि। स्थः। आत्मनेपदं। कर्म क्रिया। मुक्तावुत्तिष्ठते ॥२४॥ उपान्मन्त्रकरणे। स्थः। आत्मनेपदं। मंत्रः करणं कारकवि
शेषो यत्र तस्मिन्नर्थे। ऐन्द्र्या गार्हपत्यमुपतिष्ठते। उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वाच्यं। देवपूजायां। आदित्यमुपतिष्ठते। संगतकरणे
मुपश्लेषः। तत्र गंगा यमुनामुपतिष्ठते। उपश्लिष्यतीत्यर्थः। मित्रकरणे। महामात्रानुपतिष्ठते। पथि। पंथानमुपतिष्ठते। प्राप्नोतीत्यर्थः। वा लिप्सायामि
ति वक्तव्यं। भिक्षुकः प्रभुमुपतिष्ठते उपतिष्ठति वा। लिप्सया हेतुभूतया उपगच्छतीत्यर्थः ॥२५॥ अकर्मकाच्च। उपात्स्थ आत्मनेपदं। भोजने समये उपतिष्ठते। सन्नि
धत्त इत्यर्थः ॥२६॥ उद्विभ्यां तपः। अकर्मकादात्मनेपदं। उत्तपते वितपते। दीप्यत इत्यर्थः। स्वांगकर्मकाच्चेति वक्तव्यं। उत्तपते वितपते पाणिं ॥२७॥ आङो यमहनः।
अकर्मकादात्मनेपदं। आयच्छते। आहते। स्वांगकर्मकादित्येव। आयच्छते पाणिं। आहते शिरः ॥२८॥ समो गम्यृच्छिभ्यां। अकर्मकाभ्यामात्मनेपदं। संगच्छते।
समृच्छते ॥२९॥ निसमुपविभ्यो ह्वः। आत्मनेपदं। निह्वयत इत्यादि ॥३०॥ स्पर्धायामाङः। ह्वः। आत्मनेपदं। मल्लो मल्लमाह्वयते। स्पर्धमानो मल्लस्याह्वानं करोतीत्यर्थः।
॥३१॥ गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः। आत्मनेपदं। गंधनं हिंसा। उत्कुरुते। सूचयतीत्यर्थः। अवक्षेपणं भर्त्सनं। श्येनो वर्ति
कामुत्कुरुते। भर्त्सयतीत्यर्थः। सेवने। हरिमुपकुरुते। सेवत इत्यर्थः। परदारान्प्रकुरुते। तेषु सहसा प्रवर्तत इत्यर्थः। प्रतियत्ने। एधोदकस्योपस्कुरुते।
तस्य गुणान्तराधानं करोतीत्यर्थः। गाथाः प्रकुरुते। प्रकथयतीत्यर्थः। उपयोगे। समीचीनो विनियोगः। शतं प्रकुरुते। धर्मार्थं विनियुङ्क्त इत्यर्थः ॥३२
अधेः प्रसहने। कृञः। आत्मनेपदं। प्रसहनं क्षमा। अभिभवो वा। शत्रुमधिचक्रे। अभिभूतवान्सोढवान्वेत्यर्थः ॥३३॥ वेः शब्दकर्मणः। आत्मनेपदं। कर्मकारकं। स्वरा

कृञः १

© Dharmartha Trust J&K. Digitized by eGangotri

४

स्वरान्विकुरुते। उच्चारयतीत्यर्थः। अकर्मकाच्च। वेः कृञ आत्मनेपदं। हीनान्यनुपकर्तॄणि प्रहृत्यानि विकुरुते। ३५। संमाननोत्संजनाचार्यकरणज्ञानभृ
तिविगणनव्ययेषु नियः। आत्मनेपदं। संमानने। शास्त्रे नयते। उत्संजने। दण्डमुन्नयते। उत्क्षिपतीत्यर्थः। आचार्यकरणे। माणवकमुपनयते।
उपनयनेनाचार्यं करोतीत्यर्थः। ज्ञाने। तत्त्वं नयते। निश्चिनोतीत्यर्थः। भृतौ। कर्मकरानुपनयते। विगणनमृणादेर्निर्यातनं तत्र। मद्राः करं विनय
ते। व्यये। शतं विनयते। ३६। कर्तृस्थे चाशरीरे कर्मणि। नियः आत्मनेपदं। क्रोधं विनयते। स्वकीयं क्रोधमपगमयतीत्यर्थः। अशरीरे किं। गडुं नयति। ३७। वृ
त्तिसर्गतायनेषु क्रमः। आत्मनेपदं। वृत्तिरप्रतिबन्धः। ऋचोऽस्य क्रमते बुद्धिः। न प्रतिहन्यत इत्यर्थः। सर्गे उत्साहः। अध्ययनाय क्रमते उत्सहत इत्यर्थः।
तायने स्फीततायां। क्रमन्तेऽस्मिन् शास्त्राणि। स्फीतीभवन्तीत्यर्थः। ३८। उपपराभ्यां। वृत्तिसर्गतायनेषु क्रमः आत्मनेपदं। उपक्रमते। पराक्रमते। नेह। अनु
संक्रामति। ३९। आङ उद्गमने। क्रमः आत्मनेपदं। आक्रमते सूर्यः। उदयत इत्यर्थः। उद्गमन इति वाच्यं। नेह। आक्रामति धूमो हर्म्यतलं। ४०। वेः पादविहरणे। क्र
मः आत्मनेपदं। साधु विक्रमते वाजी। ४१। प्रोपाभ्यां समर्थाभ्यां। क्रमः आत्मनेपदं। समर्थौ तुल्यार्थौ। तच्चानयोरादिकर्मणि। प्रक्रमते। उपक्रमते। नेह।
प्रक्रामति। गच्छतीत्यर्थः। उपक्रामति। आगच्छतीत्यर्थः। ४२। अनुपसर्गाद्वा। क्रमः आत्मनेपदं। क्रमते। क्रामति। ४३। अपह्नवे ज्ञः। आत्मनेपदं। शतमप
जानीते। ४४। अकर्मकाच्च। ज्ञः आत्मनेपदं। सर्पिषो जानीते। सर्पिषा उपायेन प्रवर्तत इत्यर्थः। संप्रतिभ्यामनाध्याने। ज्ञः आत्मनेपदं। सकर्मकार्थमिदं।

सं

शतं संजानीते। प्रतिजानीते। अङ्गीकरोतीत्यर्थः। ४६। भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः। आत्मनेपदं। भासने। शास्त्रे वदते। भासमानो
ब्रवीतीत्यर्थः। उपसंभाषोपसान्त्वनं। भृत्यानुपवदते। ज्ञाने। शास्त्रे वदते। यत्ने। क्षेत्रे वदते। विमतौ। क्षेत्रे विवदन्ते। उपमन्त्रणे ज्ञापने उपवदते। ४७।
व्यक्तवाचां समुच्चारणे। वदः आत्मनेपदं। संप्रवदन्ते ब्राह्मणाः। नेह। वरतनु संप्रवदन्ति कुक्कुटाः। समुच्चारणं संभूयोच्चारणं। नेह। ब्राह्मणो वदति। ४८। ॥१८॥
अनोरकर्मकात्। व्यक्तवाचां समुच्चारणे वदः आत्मनेपदं। अनुवदते कठः कलापस्य। अनुः सादृश्ये। ४९। विभाषा विप्रलापे। व्यक्तवाचां समुच्चारणे वद
आत्मनेपदं। विप्रलापो विरुद्धोक्तिः। विप्रवदन्ते विप्रवदन्ति वा तार्किकाः। ५०। अवाद्ग्रः। आत्मनेपदं। अवगिरते। ५१। समः प्रतिज्ञाने। आत्मनेपदं। शब्दं

॥१८॥

© Dharmartha Trust J&K. Digitized by eGangotri

निसंगिरते।५२।उदश्चरः सकर्मकात्।आत्मनेपदं।धर्ममुच्चरते।५३।समस्तृतीयायुक्तात्।चरः आत्मनेपदं।रथेन संचरते।५४।दाणश्च सा चेच्चतुर्थ्यर्थे।सं
मस्तृतीयायुक्तादात्मनेपदं।सा चेत्तृतीयार्थे न।दास्यास्संप्रयच्छते।५५।उपाद्यमः स्वकरणे।आत्मनेपदं।स्वकरणे स्वीकारः।भार्यामुपयच्छते।नेह परस्य
भार्यामुपयच्छति।५६।ज्ञाश्रुस्मृदृशां सनः।आत्मनेपदं।धर्मं जिज्ञासते।गुरुं शुश्रूषते।नष्टं सुस्मूर्षते।नृपं दिदृक्षते।५७।नानोर्ज्ञः।सनन्तादात्मनेपदं।
पुत्रमनुजिज्ञासति।५८।प्रत्याङ्भ्यां श्रुवः।सन आत्मनेपदं न।प्रतिशुश्रूषति।आशुश्रूषति।५९।शदेः शितः।शितः शदेः संबन्धिन आत्मनेपदं।शीयते
नेह।शत्स्यति।६०।म्रियतेर्लुङ्लिङोश्च।आभ्यामेव आत्मनेपदं।अमृत।मृषीष्ट।म्रियते।नेह।मरिष्यति।६१।पूर्ववत्सनः।आत्मनेपदं।सनः पूर्वो यो धातु
स्तद्वत्पूर्ववत्सनः सन्नन्तात्।एदिधिषते।सिस्मयिषति।६२।आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य।आत्मनेपदं।आम्प्रत्ययो यस्मात्तस्य धातोरिव।एधांचक्रे।
६३।प्रोपाभ्यां युजेरयज्ञपात्रेषु।आत्मनेपदं।प्रयुङ्क्ते।उपयुङ्क्ते।नेह।द्वन्द्वं न्युब्जपात्राणि प्रयुनक्ति।स्वराद्यन्तोपसर्गादिति वक्तव्यं।उद्युङ्क्ते।वियुङ्क्ते।६४।समः क्ष्णुवः।
आत्मनेपदं।संक्ष्णुते शस्त्रं।६५।भुजोऽनवने।आत्मनेपदं।ओदनं भुङ्क्ते।अनवने किं।महीं भुनक्ति।संसर्गादिप्रयोगस्यापि विधिरयं वा बुभुक्तिहेतुत्वान्नेह कोकि
लार्थे भुजिर्ग्रसते किं तु भुजनपालनाभ्यवहारयोः सि सेव।नेह।विभुज्जन्निपाणिं।६६।णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने।आत्मनेपदं।आरोहयते हस्ती
निषादिनं।दर्शयते भवो राजा।अणौ यत्कर्मणौ चेदिति निषेधो वाच्यः।कर्तरि कर्मस्थतः कर्तृस्थ अनुहृत्याऽणौ यत्कर्म पश्य कर्ताणौ चैत्र एव कर्मणि
नियमः क्रियते।सकर्मकाणि वा।कर्णे नेरण्णनुस्त्राणो कर्मणाणौ कर्मत्वप्रतिपादनेऽपि अणौ कर्म कर्मभिन्नस्य णौ कर्मणोऽभावः फलति।तेनेह न।आरोह
ति हस्तिनं हस्तिपकाः स्मान्न लभारोहयति हस्ती।अणाविति किं।गणयति गणं गोपालः।गणयति गणः स्वयमेव।अनाध्याने किं।स्मरति वनगुल्मं कोकि
लः।स्मरयत्येनं वनगुल्मः स्वयमेव।६७।भीस्म्योर्भयहेतौ।णेरात्मनेपदं।हेतुः प्रयोजक कर्तृ।तनो भयं चेत्।जटिलो भीषयते।मुण्डो विस्मापयते वा।६८।[redacted]
मिथ्याकारणाभ्यासे।आत्मनेपदं।कर्त्रभिप्राये।कर्मणि चेत्कर्तृगामिनि क्रियाफले।गृधिवञ्च्योः प्रलम्भने।णेरात्मनेपदं।प्रलम्भनं

॥ द्यो॥

॥

मिथ्याफलाख्याने। माणवकं गर्द्दयते वञ्चयते वा। ६९। लियः सम्माननशालीनीकरणयोश्च। णेरात्मनेपदं। चात्यः भने। संमानने। जटाभिरालाप-
यते। शालीनीकरणे। श्येनो वर्तिकामुल्लापयते। प्रलम्भने। कस्त्वामुल्लापयते। ७०। मिथ्योपपदात्कृञोऽभ्यासे। णेरात्मनेपदं। पदं मिथ्या कारयते।
१ ७१। स्वरितञितः कर्त्रभिप्राये क्रियाफले। आत्मनेपदं। स्वरितेत। यजते। ञित। सुनुते। कर्त्रभिप्राये किं। यजन्ति ऋत्विजः। संविधानहन्तिस्थाधाल-
ब्ध एवेत्यभिप्रेतिकेभ्यत। ७२। अपाद्वदः। कर्त्रभिप्राये क्रियाफले आत्मनेपदं। अपवदते। नेह। अपवदति। ७३। णिचश्च। कर्त्रभिप्राये क्रियाफले आ-
त्मनेपदं। चोरयते। नेह। चोरयति। ७४। समुदाङ्भ्यो यमोऽग्रन्थे। कर्त्रभिप्राये क्रियाफले आत्मनेपदं। व्रीहीन् संयच्छते। भारमुद्यच्छते। वस्त्रमायच्छते।
नेह। वस्त्रमुपयच्छति। ७५। अनुपसर्गाज्ज्ञः। कर्त्रभिप्राये क्रियाफले आत्मनेपदं। गां जानीते। नेह। स्वर्गं लोकं न जानाति। ७६। विभाषोपपदेन प्रती-
यमाने। कर्त्रभिप्राये क्रियाफले आत्मनेपदं। स्वरितञित इत्यादिपञ्चसूत्र्या आत्मनेपदं कर्त्रभिप्राये क्रियाफले धातोर्विहितं तदुपपदेन द्योतिते न प्राप्नोतीति
वचनं। अभिस्मारम्भते। स्वं यज्ञं यजते इत्यादि। ७७। शेषात्कर्तरि परस्मैपदं। उक्तादन्यः शेषस्तस्मादात्मनेपदनिमित्तहीनादित्यर्थः। पठति। ७८। अनुपरा-
भ्यां कृञः। परस्मैपदं। कर्त्रगे फले गन्धनादौ प्राप्तस्यात्मनेपदस्यापवादः। अनुकरोति। पराकरोति। ७९। अभिप्रत्यतिभ्यः क्षिपः। परस्मैपदं। अभिक्षि-
पतीत्यादि। ८०। प्राद्वहः। परस्मैपदं। प्रवहति। ८१। परेर्मृषः। परस्मैपदं। परिमृष्यति। क्षिप वह मृष इति क्रियापि स्वरितेत तत्र कर्तृगामिफले परस्मैपदार्थं
विस्तरोक्तं। ८२। व्याङ्परिभ्यो रमः। परस्मैपदं। विरमतीत्यादि। ८३। उपाच्च। रमः परस्मैपदं। उपरमति। पृथग्योगकरणमुत्तरार्थं। ८४। विभाषाऽकर्म-
कात्। उपाद्रमः परस्मैपदं। उपरमति उपरमते वा। ८५। बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः। परस्मैपदं। णिचश्चेत्यस्यापवादः। बोधयति। योधयतीत्यादि।
॥ दो। ८६। निगरणचलनार्थेभ्यश्च। णेः परस्मैपदं। निगारयति। आशयति। चलयति। कम्पयति। ८७। अणावकर्मकाच्चित्तवत्कर्तृकात्। णेः परस्मैपदं। शातद ॥ ते
वदन्तः तं शापयति। ८८। न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः। णेः परस्मैपदं। पिबतिर्निगरणार्थः इतरे चित्तवत्कर्तृकाः। चलिश्चलनार्थोऽपि। तेन
तत्तत्प्राप्तस्य निषेधोऽयं। पाययते। दमयते। आयामयते। आयासयते। परिमोहयते। रोचयते। नर्तयते। वादयते। वासयते। धेट उपसंख्यानं। धापयते।

© Dharmartha Trust J&K. Digitized by eGangotri

अनुमेकं समीची ।। अकर्त्रभिप्राये शेषादिति परस्मैपदं तु स्यादेव । दमयन्तीकमनीयतामदं ।। ८९ ।। वा क्यषः । परस्मैपदं । लोहितायते । लोहितायति ।। ९० ।। द्युद्भ्यो
लुङि । परस्मैपदं वा । द्युतादयः स्पृपर्यन्ताः । बहुवचननिर्देशाद्द्युतादयः । अद्युतत् । अद्योतिष्ट । अद्युतन् । अद्योतिष्टेत्यादि ।। ९१ ।। वृद्भ्यः स्यसनोः । प
रस्मैपदं वा । द्युतादिष्वेव वृतादयः स्यन्दपर्यन्ताः । [illegible]र्त्स्यति । अवर्त्स्यत् । वर्तिष्यते । अवर्तिष्यत । विवृत्सति । विवर्तिषते इत्यादि ।। ९२ ।। लुटि च कॢपः । वा स्यसनोः ।
परस्मैपदं वा । कल्प्तासि । कल्पितासे । क[illegible]प्ता । कल्प्स्यति । कल्पिष्यते । कल्प्स्यते । अकल्प्स्यत् । अकल्पिष्यत । अकल्प्स्यत । चिकॢप्सति । चिकल्पिषते । चिकॢप्स
ते ।। ९३ ।। इति श्रीपाणिनिसूत्रवृत्त्यर्थसंग्रहे पादस्तृतीयोऽध्यायस्य प्रथमस्य समर्थितः ।। ।। ।। ।। ।। आकडारादेका संज्ञा । का पुनरसौ । या परा
नवकाशा च । आ कडारात् परं कार्यमिति पाठान्तरं ।। १ ।। विप्रतिषेधे परं कार्यं ।। २ ।। यू स्त्र्याख्यौ नदी । ईश्च ऊश्च यू । हे कुमारि । हे ब्रह्मबन्धु ।। ३ ।। नेयङुवङ्स्थानावस्त्री । यू स्त्र्याख्यौ नु
दी । हे श्रीः । हे भ्रूः ।। ४ ।। वामि । यू स्त्र्याख्यौ नदी नेयङुवङ्स्थानावस्त्री । श्रीणां । श्रियां । भ्रूणां । भ्रुवां ।। ५ ।। ङिति ह्रस्वश्च । इयङुवङ्स्थानावस्त्री । यू स्त्र्याख्यौ नदी । श्रि
भ्रुवै । भ्रुवे । मत्यै । कृतये । धेन्वै । धेनवे ।। ६ ।। शेषो घ्यसखि । हे हरे । हे भानो । शेषो नदीसंज्ञाभिन्नः । अग्नये । वायवे ।। ७ ।। पतिः समास एव । घि । भूपतये । नेह । पत्या । पत्ये ।। ८ ।।
षष्ठीयुक्तश्छन्दसि वा । पतिः । घि । ...स्य पतिना वयं ।। ९ ।। ह्रस्वं लघु । वेत्ति ।। १० ।। संयोगे गुरु । ह्रस्वं । शिक्षा । ... ।। ११ ।। दीर्घं च । गुरु स्यात् । ईहां चक्रे ।। १२ ।। यस्मात्प्रत्यय
विधिस्तदादि प्रत्ययेऽङ्गं । भवामि । भविष्यामि ।। १३ ।। सुप्तिङन्तं पदं । ब्राह्मणाः । पठन्तु ।। १४ ।। नः क्ये । नान्तमेव पदं । क्यचि । राजीयति । क्यङि । राजायते । क्यषि । चर्मायति । चर्मा
यते ।। १५ ।। सिति च । पदं भत्वापवादः । भवदीयः ।। १६ ।। स्वादिष्वसर्वनामस्थाने । पदं । स्वौजसमौट्छस्टाभ्याम् । प्रत्ययेभ्यः कप्रत्ययाः स्वादयः सर्वनामस्थानवर्जिताः
राजभ्यां । राजत्वं । राजता ।। १७ ।। यचि भं । स्वादिष्वसर्वनामस्थाने । गार्ग्यः । राज्ञः ।। १८ ।। तसौ मत्वर्थे । भं । विद्युत्वान् । यशस्वी ।। १९ ।। अयस्मयादीनि छन्दसि । भपदसंज्ञे
नि । अयस्मयं पात्रं । स जुषुप्नास स ऋतावा गणेन इत्यादि ।। २० ।। बहुषु बहुवचनं । वृक्षाः ।। २१ ।। द्व्येकयोर्द्विवचनैकवचने । वृक्षौ । वृक्षः ।। २२ ।। कारके । अधिकारोऽयं ।। २३ ।। ध्रुव
मपायेऽपादानं । अपायो विश्लेषः । ध्रुवमवधिभूतं । वृक्षात्पर्णं पतति । भीत्रार्थानां भयहेतुः । अपादानं । चोरेभ्यो बिभेति उद्विजते त्रायते रक्षति वा ।। २५ ।। पराजेरसोढः । [illegible]पादानं ।

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰ ह॰ सं॰ असोढोऽसह्यः। अध्ययनात्पराजयते। स्यापृत्तीस्पर्धः २६। वार्णयानामीप्सितः। अपादानं प्रवृत्तिविघातो वारणं। यवेभ्यो गां वारयति २७। अंतर्धौ येनादर्शनमिच्छति। अपादानं। मातुर्निलीयते कृष्णः। २८। आख्यातोपयोगे अपादानं। उपयोगो नियमपूर्वकविद्यास्वीकारः। आख्याता वक्ता। उपाध्यायादधीते। २९। जनिकर्तुः प्रकृतिः। अपादानं। पुत्रात्प्रमोदो जायते। ३०। भुवः प्रभवः। कर्तुरपादानं। हिमवतो गंगा प्रभवति। प्रकाशनस्पर्थः। ३१।

10

1170

५००

११७०॥

अंब

© Dharmartha Trust J&K. Digitized by eGangotri